॥ यज्ञ मन्त्रम् ॥

॥ गुरु दक्षिणा-मूर्ति ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं
दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु स्वाहा

विश्वं दर्पण-दृश्य-मा-ननगरी- तुल्यं निजान्-तर्गतं
पश्य-न्नात्मनि मायया बहिर्-इवोद्- भूतं यदा निद्रया ।
यः साक्शात्-कुरुते प्रबोध-समये स्वात्मा-नमेवा-द्वयं
तस्मै श्रीगुरु-मूर्तये नम इदं श्रीदक्शिणा-मूर्तये ॥

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुदेवो महेश्वरः ।
गुरुर्-सक्शात्-पारब्रह्म तस्मै श्री गुरवे नमः ॥
गुरवे सर्व-लोकानां भिषजे भव रोगिणाम् ।
निधये सर्व विद्यानां श्री दक्षीणा-मूर्तये नमः ॥

तत्-दक्षीणाय विद्महे गुरु-मूर्तये धीमहि ।
तन्न शिवः प्रचोदयात् ॥

दक्षीणामूर्त्यैच विद्महे ध्यानस्थाय धीमहि ।

तन्नो धीशः प्रचोदयात् ॥

तत् पुरुषाय विद्महे विद्या-वासाय धीमहि ।

तन्नो दक्षीणामूर्तिः प्रचोदयात् ॥

गणनाथाय विद्महे अमृतकाय धीमहि ।

तन्नो धिशः प्रचोदयात् ॥

ऐंकार ह्रींकार रहस्य युक्त

श्रीं कार कूधर्थ महाविभुत्यः ।

ॐ कार मर्म प्रदि-पाणिभ्यां

नमो नमः , श्रीगुरु पादुकाभ्यां ॥

आज्ञान-नाशनाय विद्महे ज्ञान-प्रकषाय धीमहि ।

तन्नो गुरु-पादुका प्रचोदयात् ।

ॐ नमो भगवते दक्षीणामूर्तये । मह्यं । श्रीयं । मेधां । प्रज्ञां प्रयछ स्वाहा ।

ॐ गणनाथ्-आमृत्-आनन्द-स्वामीने नमः ।

॥

॥ गणपति मन्त्रम् ॥

। ॐ । गणानां त्वा गणपति ँ हवामहे
कविङ् कवीनाम्-उपम-श्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मण-स्पत
आ नः शृण्व-न्नूतिभिः सीद् सादनम् ॥

नमो व्रातपतये । नमो गणपतये । नमः प्रमथ-पतये । नमस्ते अस्तु लम्बो-दराय
एकदन्ताय विघ्न-विनाशिने शिव-सुताय श्री-वरद-मूर्तये नमो नमः ॥

शुक्लाम्-बरधरं विष्णुं शशि-वर्णं चतुर्भुजम् ।
प्रसन्-नवदनं ध्यायेत् सर्वविघ्नो-पशान्तये ॥

वक्रतुण्ड महा-काय सूर्य कोटि समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥

एकदन्ताय विद्महे वक्र-तुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥
तत् पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

तत् करटाय विद्महे हस्ति-मुखाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

महा-बुद्ध्यै च विद्महे मोहनाशिन्यै धीमहि ।

तन्नो बुद्धिः प्रचोदयात् ॥

महा-सिद्ध्यै च विद्महे गजा-राजयै धीमहि ।

तन्नो सिद्धिः प्रचोदयात् ॥

ॐ गं गणपतये नमः ।

ॐ गं गणेशाय नमः ।

ॐ वक्रतुण्डाय हुं ॥

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये । वर वरद । सर्व जनं मे । वशमनाय स्वाहा ॥

॥ लक्ष्मि-गणपति मूल मन्त्रम् ॥

ॐ श्रीं गं सौम्याय गणपतये । वर वरद । सर्व जनं मे । वशमनाय स्वाहा ॥

॥ हरिद्रा गणपति मूल मन्त्रम् ॥

ॐ हुं गं ग्लौं हरिद्रा-गणपतये वर वरद सर्व-जन हृदयं स्तम्भय स्तम्भय स्वाहा ॥

॥ त्रिमुर्ति गणपति मन्त्रम् ॥

त्वं गुण-त्रयातीतः। त्वं अवस्था-त्रयातीतः। त्वं देह-त्रयातीतः। त्वं काल-त्रयातीतः। त्वं मुलाधार-स्थितोऽसि नित्यम्। त्वं शक्ति-त्रयात्-मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्म त्वं विष्णु-स्त्वं रुद्रस्त्वम्-इन्द्रस्त्वम्-अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमा-स्त्वं ब्रह्म भूर्-भुवः सुवरोम् ॥

ॐ ह्रीं क्लीं श्रीं गं नागं त्रयी-मूर्तये। गुणा-त्रया-तीताय। पर-ब्रह्म-विद्या-रूपाय। सर्व-विघ्न-विनाशिने। बुद्धि-सिद्धि-योगा-नन्दात्मने ॥

ॐ ह्रीं क्लीं श्रीं गं गं गं नागं नागं ॥

ओं नमो भगवते त्रिमूर्ति-गणपतये नमो नमः ॥

[ ॐ नमो भगवते त्रिमूर्ति-गणपतये त्रः स्वाहा ]

एकदन्ताय विद्महे त्रि-पतये च धीमहि।
तन्नो ताक्षः प्रचोदयात् ॥

अव्यक्त-मूर्तये च विद्महे गणपाय धीमहि।
तन्नो शिवः प्रचोदयात् ॥

ॐ ह्रीं अव्यक्त-मूर्तये नमः ॥

श्री-कारणाय विद्महे त्रि-हरये च धीमहि ।

तन्नो विष्णुः प्रचोदयात् ॥

ॐ क्लीं श्रीपतये नमः ॥

महा-देव्यै च विद्महे शुक्ल-कालयै च धीमहि ।

तन्नः शक्तिः प्रचोदयात् ॥

ॐ स्त्रीं शक्ति-सं-युतायै नमः ॥

॥ दीप मन्त्रम्स् ॥

मनो ज्योतिर्-जुषता-माज्यं विच्छिन्नं यज्ञं समिमं दधातु ।

बृहस्पति-स्तनुता-मिमं नो विश्वे देवा इह मादयन्ताम् ॥

शुभं करोति कल्याणं आरोग्यं धन-सम्पदः ।

शत्रु बुद्धि विनाशाय दीप-ज्योतिः नमोऽस्तु ते ॥

दीपो ज्योतिः परं ब्रह्म दीपो ज्योतिः जनार्दनः ।

दीपो हरतु मे पापं सन्ध्या दीपं नमोऽस्तु ते ॥

ॐ दीप देवताभ्यो नमः ।

॥ पृथिवि मन्त्रम् ॥

उर्वी पृथ्वी बहुले दूरे अन्ते ।

उपब्रुवे नमसा यज्ञे अस्मिन् ।

दधाते ये सुभगे सुप्रतूर्ती ।

द्यावा रक्षतं पृथिवी नो अभ्वात् ॥

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।

त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि ।

तन्नो धरा प्रचोदयात् ॥

पृथ्वि-देव्यै च विद्महे सहस्रमूर्त्यै च धीमहि ।

तन्नो पृथिविः प्रचोदयात् ॥

ॐ लं पृथिव्यै नमः ॥

॥ शङ्ख मन्त्रम् ॥

पांचजन्याय विद्महे पावमानाय धीमहि ।

तन्नो शंखः प्रचोदयात् ॥

॥ वरुण मन्त्रम् ॥

तत्व यामि ब्रह्मणा वन्दमान-स्तदाशास्ते यजमानो हविर्भिः।

अहे-डमानो वरुणेह बोध्युरुशगं समा न आयुः प्रमोषीः ,॥

जाल-बिम्बाय विद्महे नील पुरुषाय धीमहि।

तन्नो वरुणः प्रचोदयात् ॥

ॐ वं वरुणाय नमः।

॥ पवित्र मन्त्राः ॥

आप वित्र पवित्रो वः सर्व-वष्टन्ग तोपि वः।

यः स्मारेत् पुन्दरीकक्षं सः बहय भ्यन्तर शुचिः ॥

॥ अग्नि मन्त्रम् ॥

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपागं रेतागंसि जिन्वति ॥

वैश्वनराय विध्महे ललेलाय धिमहि।

तन्नो अग्निः प्रचोदयात् ॥

ॐ अं हं रं अग्नये नमः ।

ॐ रं अग्नये नमः ॥

॥ मुरुग मन्त्रम् ॥

ॐ निर्ग्रुष्वैर समायुतैः, ।

कालैर्-हरित्व-मापन्नैः, ।

इन्द्रायाहि सहस्त्रयुक् ।

अग्निर्-विभ्राष्टि-वसनः, ।

वायुः श्वेतसि-कद्रुकः ।

संवत्सरो विषू-वर्णैः ।

नित्या-स्तेऽनुचरा-स्तव ।

सुब्रह्मण्यगं सुब्रह्मण्यगं सुब्रह्मण्यों ॥

षडाननं कुङ्कुम-रक्त-वर्णं

महा-मतिं दिव्य-मयूर-वाहनम् ।

रुद्रस्य सूनुं सुरसैन्य-नाथं

गुहं सदाऽहं शरणं प्रपद्ये ॥

ज्ञान-शक्ति-धर स्कन्द वल्लि-कल्याण सुन्दर ।
देवसेना नमः कान्त कार्तिकेय नमोऽस्तुते ॥

वल्ली देवी प्राण-नाथं वाञ्छि-तार्थ प्रदायकं ।
सिंहासने सुखा-सीनं सूर्यकोटि समप्रभम् ॥

तत् पुरुषाय विद्महे महा सेनाय धीमहि ।
तन्नः षण्मूखः प्रचोदयात् ॥
तत् कुमाराय विद्महे कार्त्तिकेयाय धीमहि ।
तन्नः स्कन्दः प्रचोदयात् ।

ॐ शरवणभव ।
ॐ सं शरवणभवाय नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौं । शरवण-भवाय स्वाहा ॥
ॐ कं क्षं कं कार्त्तिकेयाय हुं फट् स्वाहा ॥

॥ सर्प मन्त्रम्स् ॥

नमो अस्तु सर्पेभ्यो ये के च पृथिवी-मनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥

राज-राजाय विद्महे नाग-राजाय धीमहि ।
तन्नो शेषः प्रचोदयात् ।
सहस्र-शिर्षाय विद्महे विष्णु-तल्पाये धीमहि ।
तन्नो नागः प्रचोदयात् ॥
नवकुलाय विद्महे विषदन्ताय धीमहि ।
तन्नः सर्पः प्रचोदयात् ॥

ॐ नमो भगवते काम-रूपिणे महा-बलयय नाग-धीपतये अनन्ताय स्वाहा ।
ॐ सं सर्पाय नमः ॥

॥ नन्दि ॥
ऋषभं मा समानानां सपत्नानां विषासहिं ।
हन्तारं शत्रूणां कृधि विराजं गोपतिं गवां ॥

तत् पुरुषाय विद्महे चक्रतुण्डाय धीमहि ।
तन्नो नन्दिः प्रचोदयात् ॥

तत् वृषभाय विद्महे शिव भक्ताय धीमहि ।

तन्नो नन्दिः प्रचोदयात् ॥

ॐ व्रिं ह्रीं क्रीं क्रौं नाद हुं फट् स्वाहा ।

ॐ  ॐ व्रीं वृषभाय स्वाहा ।

ॐ नन्दि-केश्वराय स्वाहा ॥

॥ शिव ॥

ॐ नमः शंभवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टि-वर्धनम् ।

उर्वा-रुकमिव बन्धनान्-मृत्योर्-मुक्शीय माऽमृतात् ॥

॥ पञ्च शिव मन्त्रम् ॥

सद्योजातं प्रपद्यामि सद्योजाता-यवै नमो नमः ।

भवे भवे नाति भवे भवस्वमां । भवोद्भवाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नम-श्श्रेष्ठाय नमो रुद्राय नमः। कालाय नमः

कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बल-प्रमथनाय नम

स्सर्वभूत-दमनय नमो मनोन्-मनाय नमः॥

अघोरेभ्योऽथ घोरेभ्यो घोर-घोर-तरेभ्यः।

सर्वेभ्य-स्सर्वसर्वेभ्यो नमस्ते अस्तु रुद्र-रूपेभ्यः॥

तत्-पुरुषाय विद्महे महादेवाय धीमहि।

तन्नो रुद्रः प्रचोदयात्॥

ईशान-स्सर्व-विद्यानम्-ईश्वरस्-सर्व-भूतानाम्।

ब्रह्मा-धिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा। शिवो मे अस्तु सदा-शिवोम्॥

नमो हिरण्य-बाहवे हिरण्य-वर्णाय हिरण्य-रूपाय।

हिरण्य-पतयेऽम्बिका-पतय उमापतये पशु-पतये नमो नमः ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय

त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय

श्रीमन्-महादेवाय नमः॥

मृत्युङ्जयाय देवाय नीलकण्ठाय शम्भवे।

अमृतेशाय सर्वाय महादेवाय ते नमः॥

नमः शिवाय शान्ताय कारणत्रय हेतवे।

निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥

सदाशिवाय विद्महे सहस्राक्ष्याय धीमहि।

तन्नो साम्बः प्रचोदयात्॥

ॐ नमो भवगते रुद्राय॥

ॐ नमो भगवते रुद्राय विष्णवे मृत्योर् मे पाहि।

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः।

तेना-न्नेनाप्यायस्व।

नमो रुद्राय विष्णवे मृत्योर् मे पाहि।

ॐ हं शिवाय नमः॥

ॐ ह्रीं शिवाय नमः॥

ॐ नमः शिवाय स्वाहा।

ॐ शिवाय नमः स्वाहा।

ॐ वाशिय नमः स्वाहा॥

॥भैरव॥

मोहघ्नं ज्ञानदं नित्यं वटुकं मुक्ति-दायकम्।
काशी-पुरनि-वासं च काला-भैरव-माश्रये॥
सहस्र-पाणी पद्चक्रं सह-स्त्रद्राय लोचनम्।
सर्व-भिष्ट प्रधं देवं वन्दे आकाष भैरवम्॥

काल-कालाय विद्महे कालतीताय धीमहि।
तन्न क्काल-भैरवः प्रचोदयात्॥
सुवर्ण-द्वाजाय विद्महे शूल-हस्ताय धीमहि।
तन्नो भैरवः प्रचोदयात्॥

ॐ काल भैरवाय नमः।
ॐ ह्रीं वटुकाय आपदु-द्धरणाय कुरु कुरु वटौकाय ह्रीं।
ॐ ह्रीं वं वटुकाय आपदु-द्धरन्णय वटुकाय ह्रीं॥
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं क्षं क्षेत्रपालाय काल भैरवाय नमः।
ॐ नमो भगवते महा-भैरवाय॥

॥ ब्रह्म॥

ब्रह्म-जज्ञानं प्रथमं पुरस्ता-द्विसी-मत-स्सुरुचो वेन आवः। सबुध्निया उपमा अस्य विष्ठा-स्सतश्च योनि-मसतश्च विवः॥

नमस्ते परमं ब्रह्म नमस्ते परमात्मने ।

निर्गुणाय नमस्तुभ्यं सद्रूपाय नमो नमः ॥

चतुर्मुखाय विद्महे हंसारूढाय धीमहि ।

तन्नो ब्रह्मा प्रचोदयात् ॥

वेदात्मने च विद्महे हिरण्यगर्भाय धीमहि ।

तन्नो ब्रह्मा प्रचोदयात् ॥

ॐ ब्रह्मणे नमः ।

ॐ ह्रीं ब्रह्मणे नमः ।

ॐ पर-ब्रह्मणे नमः ॥

॥ देवी ॥

अहं रुद्रेभिर्-वसुभिश्-चराम्यह- मादित्यै-रुत विश्वदेवैः ।

अहं मित्रा-वरुणोभा बिभर्म्यह- मिन्द्राग्नी अहम-श्विनोभा ॥

सर्वसंमोहिन्यै विद्महे विश्वजनन्यै धीमहि ।

तन्नो शक्तिः प्रचोदयात् ॥

ॐ क ए इ ल ह्रीं। ह स क ह ल ह्रीं। स क ल ह्रीं॥

ॐ परमेश्वर्यै नमः।

ॐ पराशक्त्यै नमः।

ॐ ललिताम्-बिकायै नमः।

॥ सरस्वती ॥

प्राणो देवी सरस्वती वाजेभिर्वा जिनीवती।

धीनाम वित्र्यवतु॥

सरस्वति नमस्तुभ्यं वरधे काम रूपिणी।

विद्य-रम्भं करिश्यामि सिद्धिर्-भवतु मे सदा॥

वाग्-देव्यै च विद्महे ब्रह्म-पत्नि च धीमहि।

तन्नो वनिः प्रचोदयात्॥

ॐ ह्रीं ऐं ह्रीं सरस्वत्यै नमः॥

ॐ श्री सरस्वत्यै नमः।

ॐ ऐं क्लीं सौः सरस्वत्यै नमः ॥

ॐ ऐं सरस्वत्यै नमः ॥

॥ महा-लक्ष्मी ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियंलोके देव-जुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥
गंध-द्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्व-भूतानां तामि-होपह्वये श्रियम् ॥

पद्मा-सने पद्म-करे सर्व-लोकैक पूजीते ।
नारायणि प्रिये देवि सुप्रीथ भव सर्वदा ॥
नमस्तेऽस्तु महा-माये श्रीपीठे सुर-पूजिते ।
शङ्ख-चक्र-गदा-हस्ते महा-लक्ष्मि नमोऽस्तुते ॥

महा-लक्ष्म्यै च विद्महे विष्णु-पत्नि च धीमहि ।
तन्नो लक्ष्मिः प्रचोदयात् ॥
महा-देव्यै च विद्महे विष्णुपत्नी च धीमहि ।

तन्नो लक्ष्मीः प्रचोदयात् ॥

ॐ महा-लक्ष्म्यै नमः

ॐ ह्रीं श्रीं क्रीं महा-लक्ष्म्यै नमः

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद् प्रसीद् श्रीं ह्रीं श्रीं महा-लक्ष्म्यै नमः ॥

ॐ श्रीं ह्रीं क्लीं त्रिभुवन महा-लक्ष्म्यै अस्माकं दरिद्रय दरिद्रय नाशय नाशय प्रचुर प्रचुर धन धन देहि देहि क्लीं ह्रीं श्रीं स्वाहा ॥

ॐ क्लीं महा-लक्ष्म्यै नमः ॥

ॐ कमल-धारिण्यै सिंह-वाहिण्यै महा-लक्ष्म्यै स्वाहा ।

ॐ कमल-धारिण्यै धारिन्-कर्रिषैण्यै कुबेर-लक्ष्म्यै स्वाहा ॥

॥ करुण्या देवी मन्त्रम्स् ॥

ॐ नमो भगवती करुण्या-रुपिण्यै । परा-शक्त्यै । महादेव्यै । त्रिलोक-क्रोधा-शमन्यै । महा-कोषस्वरायै । आवय-राज्यै । ॐ कं कं शं शं ध्लीं ध्लीं । अभय हन हन । क्रोध मर्धय मर्धय । कारुण्या धन धन । निरय गल गल । गलय धार धार । आरभाये होचन होचन । भस्मि-कुरु भस्मि-कुरु । ॐ अं आं ह्रीं श्रीं ध्लीं ध्लीं हा वु । ॐ नमो भगवती कन्या कुमार्यै ॥

काम-दायिन्यै विद्महे क्रोधा-नशिन्यै धीमहि ।
तन्नो अम्बाः प्रचोदयात् ॥

ॐ शं ध्लीं हुं फट् स्वाहा ॥

ॐ कं शं ध्लीं करुण्या-देव्यै स्वाहा ॥

ॐ नमो भगवती करुण्या-देव्यै ॥

॥ राज-राजेश्वरी ॥

अम्बा शाम्भवि चन्द्रमौलिरबलाऽपर्णा उमा पार्वती

काली हैमवती शिवा त्रिनयनी कात्यायनी भैरवी ।

सावित्री नवयौवना शुभकरी साम्राज्यलक्ष्मीप्रदा

चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥

॥ अन्नपूर्णा ॥

अन्नपूर्णे सदापूर्णे शङ्कर-प्राण-वल्लभे ।

ज्ञान-वैराग्य-सिद्ध्यर्थं भिक्षां देहि च पार्वति ॥

माता च पार्वती देवी पिता देवो महेश्वरः ।

बान्धवाः शिव-भक्ताश्च स्वदेशो भुवन-त्रयम् ॥

भगवत्यै च विद्महे माहेश्वर्यै च धीमहि ।

तन्नो अन्नपूर्णाः प्रचोदयात् ॥

ॐ नमो भगवति महेश्वरी अन्न-पुर्णेश्वर्यै स्वाहा ॥

॥ दुर्गा ॥

जात-वेदसे सुन-वाम सोम-मरा-तीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्याग्निः ॥
ताम् अग्नि-वर्णां तपसा ज्वलन्तीं वैरो-चनीं कर्म-फलेषु जुष्टाम् ।
दुर्गां देवीगं शरणम्-अहं प्रपद्ये सुतरसि तरसे नमः ॥

सर्व-मङ्गल- मङ्गल्ये शिवे सर्वार्थ-साधिके ।
शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥
सृष्टिस्-थिति-विना-शानां शक्ति-भूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥
शरणा-गत-दीनार्त-परित्राण-परायणे ।
सरस्यार्ति-हरे देवि नारायणि नमोऽस्तु ते ॥
या देवी सर्व-भूतेषु मतृरूपेन संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥
या देवी सर्व-भूतेषु लक्ष्मी-रूपेन संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्व-भूतेषु शक्ति-रूपेन संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्व-भूतेषु शान्ति-रूपेन संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

कात्यायानाय विद्महे कन्य-कुमारि धीमहि ।

तन्नो दुर्गिः प्रचोदयात् ॥

महाशूलिन्यै विद्महे महादुर्गायै धीमहि । तन्नो भगवती प्रचोदयात् ॥

ॐ छमुण्डाम्-बिकयै नमः ।

ॐ ह्रीं दुं दुर्गायै नमः ।

ॐ दुम् दुर्गायै नमः ॥

ॐ ऐं ह्रीं क्लीं छमुण्डायै विच्चे ।

॥ पार्वती कालि ॥

गौरी मिमाय सलिलानि तक्शत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी

बभूवुषी सहस्राक्शरा परमे व्योमन् ॥

ललिताम्-बिकयै विद्महे महा-तपयै धीमहि ।

तन्नो गौरिः प्रचोदया᳚त्।

महा-देव्यै च विद्महे रुद्र-पत्नि च धीम्हि।

तन्नो गौरीः प्रचोदया᳚त्॥

गिरि-जायै च विद्महे शिवप्रियायै च धीमहि।

तन्नो कालिः प्रचोदयात्॥

महा-काल्यै च विद्महे श्मशान-वासिन्यै च धीमहि।

तन्नो कालिः प्रचोदया᳚त्॥

कालिकायै च विद्महे श्मशान-वासिन्यै च धीमहि।

तन्नो अघोराः प्रचोदयात्॥

आद्यायै च विद्महे परमेश्वर्यै च धीमहि।

तन्नो कालीः प्रचोदयात्॥

ॐ ह्रीं ह्रीं हुं हुं क्रीं क्रीं क्रीं। दक्षिणे कालीके। ॐ क्रीं क्रीं क्रीं हुं हुं ह्रीं ह्रीं स्वाहा॥

ॐ ह्रीं पार्वत्यै नमः।

ॐ ह्रीं परमेश्वर्यै नमः।

ॐ ललिताम्-बिकयै नमः।

ॐ क्रीं काल्यै नमः।

॥ विष्णु॥

यस्य-द्विरद वक्राध्याः पारिशद्याः परः सतम् ।

विघ्नं निघ्नन्ति सततं विश्वक्सेनं तमाश्रये ॥

तत् पुरुषाय विद्महे सुवर्ण-पक्षाय धीमहि ।

तन्नो गरुडः प्रचोदयात् ॥

सहस्रशीर्षा पुरुषः । सहस्राक्शः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठ-द्दशाङ्गुलम् ॥

सहस्रशीर्षं देवं विश्वाक्शं विश्वशम्भुवं ।

विश्वं नारायणं देवमक्शरं परमं पदम् ॥

ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्शं विश्वरूपाय वै नमो नमः ।

तद्विष्णोः परमं पदग्ं सदा पश्यन्ति सूरयः ।

दिवीव चक्शुराततम् ॥

तद्विप्रासो विपन्यवो जागृवाग्ं सस्समिन्धते ।

विष्णोर्यत्-परमं पदम् ॥

विना वेङ्कटेशं न नाथो न नाथः

सदा वेङ्कटेशं स्मरामि स्मरामि ।

हरे वेङ्कटेश प्रसीद प्रसीद प्रियं

वेङ्कटेश प्रयच्छ प्रयच्छ ॥

श्रियः कान्ताय कल्याण निधये निधयेऽर्-थिनां

श्री-वेङ्कट-निवासाय श्रीनिवा-साय मङ्गलम् ॥

नारायणाय विद्महे वासुदेवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात् ॥

निरञ्जनाय विद्महे निरपशाय धीमहि ।

तन्नो श्रीनिवासः प्रचोदयात् ॥

महा-देव्यै च विद्महे विष्णु-पत्नि च दीमहि ।

तन्नो नीलः प्रचोदयात् ॥

ध॒नुर्ध॒रायै॑ वि॒द्महे॑ सर्वसि॒द्धयै च॑ धीमहि ।

तन्नो॑ धरा प्रचो॒दया᳚त् ॥

पद्मासनाय विद्महे पद्म-हस्तयै च धीमहि ।

तन्नो पद्मावतिः प्रचोदयात् ॥

ॐ महा-विष्णवे नमः ।

ॐ नमो नारा॑यणाय ।

ॐ नमो भगवते॑ वसुदेवाय ।

ॐ क्लीं वेङ्कटेश्वराय नमः ।

॥ सुदर्शन ॥

सुदर्शन महा-ज्वाल कोटि सूर्य समप्रभा ।

आज्ञानान्धस्य मे देव विष्णोर् मार्ग प्रदर्षयः ॥

सुदर्शनाय विद्महे महा-ज्वालाय धीमहि ।

तन्नस् चक्रः प्रचोदयात् ॥

सुदर्शनाय विद्महे ज्वाल-चक्राय धीमहि ।

तन्नो ज्वाल चक्रः प्रचोदयात् ॥

ॐ आ चक्राय स्वाहा᳚ ।

ॐ वी चक्राय स्वाहा᳚ ।

ॐ सु चक्राय स्वाहा᳚ ।

ॐ भी चक्राय स्वाहा᳚ ।

ॐ शट् चक्राय स्वाहा᳚ ।

ॐ ज्वाल चक्राय स्वाहा᳚ ॥

॥ तुल्सि गायत्रि ॥

तुलसि-देव्यै च विद्महे विष्णु-प्रियायै च धीमहि ।

तन्नो बृन्दः प्रचोदयात् ॥

॥ हरिद्रा गायत्रिम् ॥

हलदि-देव्यै च विद्महे हरिद्रायै च धीमहि ।

तन्नो गौरिः प्रचोदयात् ॥

॥ राम परिवार ॥

श्रीराम राम रामेति रमे रामे मनोरमे ।

सहस्र-नाम तत्तुल्यं राम नाम वरानने ॥

रामाय राम-भद्राय राम-चन्द्राय वेदसे ।

रघु-नाथाय नाथाय सीताय पतये नमः ॥

दशरथाय विद्महे सीता-वल्लभाय धीमहि ।

तन्नो रामः प्रचोदयात् ॥

जानक नन्दिन्यै विद्महे भूमिजयै च धीमहि ।

तन्नः सीताः प्रचोदयात् ॥

ॐ रं रामाय स्वाहा ॥

ॐ सीं सीतायै नमः ॥

त्वमस्मिन् कार्य नियोंगे प्रमानं हरि सत्तम ।

हनुमन् यत्न मास्थाय दुख क्षय करो भव ॥

आञ्जनेयाय विद्महे वायु-पुत्राय धीमहि ।

तन्नो हनुमन् प्रचोदयात् ॥

आंजनेयाय विद्महे महाबलाय धीमहि ।

तन्नो हनुमातः प्रचोदयात् ॥ ।

ॐ ऐं श्रीं हनुमते । श्री राम दूताय नमः ॥

ॐ हं हनुमते रुद्रात्मकाय हुं फट् ।

ॐ हं हनुमते नमः ॥

॥ कृष्ण ॥

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्ण-पिङ्गलम् ।

ऊर्ध्व-रेतं विरूपाक्शं विश्व-रूपाय वै नमो नमः ॥

वासुदेव-सुतं देवं कंस चाणूर-मर्दनम् ।

देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

नमो ब्रह्मण्य-देवाय गोब्रह्मणा-हिताय च ।

जगद् हिताय कृष्णाय गोविन्दाय नमो नमः ॥

अतसि पुष्प सङ्काशं हार नूपुर शोभितम् ।

रत्न कन्कण केयूरं कृष्णं वन्दे जगद्-गुरुम् ॥

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।

हरे राम हरे राम राम राम हरे हरे ॥

दामोदराय विद्महे रुक्मिणी-वल्लभाय धीमहि ।

तन्नो कृष्णः प्रचोदयात् ॥

देवकीनन्दनाय विद्महे वासुदेवाय धीमहि ।

तन्नो कृष्णः प्रचोदयात् ॥

गोविन्दाय विद्महे गोपीवल्लभाय धीमहि ।

तन्नो कृष्णः प्रचोदयात् ।

वृषभानुजयै विद्महे कृष्ण-प्रियये च धीमहि ।

तन्नो राधाः प्रचोदयात् ॥

ॐ ह्रीं श्रीं क्लीं कृष्णाय गोविन्दाय गोपी । वन वल्लभाय । पराय परम पुरुषाय परमात्मने । पर-कर्म मन्त्र यन्त्र तन्त्र औषत । अस्त्र-शास्त्रनि संहर संहर । मृत्योर् मोचय मोचय । ॐ नमो भगवते महा-सुदर्षनाय दिप्त्रे । ज्वाला परीताय सर्व-दिक् शोभण-कराय । हुं फट् ब्रह्मणे परं-ज्योतिषे स्वाहा ॥

ॐ ह्रीं गोविन्दाय नमः ।

ॐ श्रीं श्रीणिवासाय नमः ।

ॐ क्लीं कृष्णाय नमः ।

॥ नारसिंह ॥

ॐ नमो भगवते महा नृसिंहाय नमः ।

नमस् ज्वालस् तेजसे आविर् आविर् भव वज्र-नख वज्र-दग्ग्-ष्ट्राय कर्मा-सयन्

रन्धय रन्धय तमोग्रः चक्रतः स्वाहा । अभयं अभयं आत्मनि-भूयुष्ठाः ।

ॐ श्रौं नमः ।

उग्रं वीरं महा-विष्णुं ज्वलन्तं सर्वतो-मुखं ।

नृसिंहं भीषणं भद्रं मृत्युं मृत्युं नमा-म्यहं ।

ॐ सहस्त्रारा हुं फट् स्वाहा ॥

वज्र-नखाय विद्महे तीक्ष्ण-दग्ग्ष्ट्राय धीमहि ।

तन्नो नार-सिंग्हः प्रचोदयात् ॥

नृसिंहाय विद्महे वज्र-नखाय धीमहि ।

तन्नो सिंहः प्रचोदयात् ॥

ॐ श्रौं नार-सिंहाय स्वाहा ॥

॥ मृत्युञ्जय । वैद्यनाथ । धन्वन्त्रि ॥

ॐ हौं जूं सः ।

ॐ त्र्यंबकं यजामहे सुगन्धिं पुष्टि-वर्धनं ।

उर्वा-रुकमिव बन्धनान् मृत्योर् मूक्षीय माम्ऽमृतात् ॥

सः जूं हौं स्वाहा ॥

मृत्युञ्जय जपं नित्यं यः करोति दिने दिने ।

तस्य रोगाः प्रन्नश्यन्ति दीर्घायुश्चं प्रजायते ।

मृत्युञ्-जयस्य मन्त्रं वै जपते यदि मानुषः ।

कोटि वर्ष शतं स्थित्वा लीनो भवति ब्रह्मान्नि ।

ॐ नमो बगवते महा-मृत्युञ्जयाय ॥

॥ बल वैद्यनाथ ॥

बलं धेहि तनूषु नो बलमिन्द्रा-नळुत्सु नः ।

बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥

ॐ ह्रीं श्रीं क्रीं । हौꣳ हं वूः । सर्व-बन्धन-निवरणाय । यम-नामर्च्चिते । बल-वैद्य-नाथाय । हाल हाल नमः । ॐ सौं जूं हꣳ सः । पारद् मोक्षार्थं । शिव-जीव-मूर्तये । ॐ वैं नमः शिवाय स्वाहा ॥

रोग-नाशिनाय विद्महे वैद्य-नाथाय धीमहि ।
तन्नो बलः प्रचोदयात् ॥

ॐ हौँ जूं॒ वैं नम॑ः शिवा॒य ॥

॥ धन्वन्त्रि ॥

यो ब्रह्मण उ॑ज्जहा॒र प्रा॒णैः शि॒रः कृत्ति-वासा᳚ः पिना॒की ।
ईशानो देवः स न आयु॑र्दधा॒तु॒ तस्मै जुहोमि हविषा॑ घृते॒न ॥

ॐ नमो भगवते महा-सुदर्षन भो भो । चक्र-दुष्टं धारय धारय । दुरीतं हन हन । पापं दह दह । रोहं मार्धय मार्धय । अरोग्यं कुरु कुरु । ॐ ॐ रं रं रीं रीं फट् फट् दह दह हन हन भिषय भिषय नमः ॥

ॐ नमो भगवते महा-सुदर्षनाय वासुदेवाय धन्वन्तरये । अमृत-कलश-हस्ताय । सर्वभय-विनाषाय । सर्वरोग-निवरनाय । त्रैलोक्य पतये । त्रैलोक्य निधये । श्री

महा-विष्णु स्वरूपाय । श्री धन्वन्त्रि स्वरूपाय । श्री श्री श्री औषत चक्र-
नारायणाय स्वाहा ॥

अमृतोद्-भवाय विद्महे अमृत देवाय धीमहि ।
तन्नो धन्वन्त्रिः प्रचोदयात् ॥
वासुदेवाय विद्महे वैद्यराजाय धीमहि ।
तन्नो धन्वन्त्रिः प्रोचोदयात् ॥

ॐ नमो भगवते धन्वन्तरये ।
ॐ धं धन्वनतरये नमः ।

॥ स्वामी अय्यप्पान् ॥
धातावि-धाता-परमोतसंद्दक्-प्रजापतिः परमेष्ठी-विराजा ।
स्तोमाश्छं-दाग्ं-सिनिवि-दोम आहुरो-तस्मै-राष्ट्रम-भिसन्नमाम ॥
अभ्यावर्त-द्दव-मुप-मोतसा-कमयग्ं शास्ताधि-पतिर्वो अस्तु ।
अस्य विज्ञान-मनुसग्ं रभध्व-मिमं-पश्चादनु जीवाथ-सर्वे ॥

लोक-वीरं महा पूज्यां सर्वक्षकरं विभुम् ।
पार्वती-हृदयानन्दं शातारं प्रणमाम्यहम् ॥

स्वामीये शरणं अय्यप्पा ॥

बुध-नाथाय विद्महे भव-पुत्राय धीमहि ।
तन्नः शास्तः प्रचोदयात् ॥

ॐ महा-शास्त्रे नमः ।
ॐ हरि-हर-पुत्र-स्वामिने नमः ॥

॥ नव ग्रह ॥

॥ आदित्य ॥

आसत्येन रजसा वर्तमानो निवेशय-न्नमृतं मर्त्यं च । हिरण्ययेन सविता
रथेनाऽऽदेवो याति भुवना विपश्यन् ।

जपा-कुसुम-संकाशं काश्य-पेयं महाद्युतिम् ।
तमोऽरिं सर्व-पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

भास्कराय विद्महे महा-द्यूति-कराय धीमहि । तन्नो आदित्यः प्रचोदयात् ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

आदित्याय नमः ।

ॐ ह्रीं सूर्याय नमः

ॐ ह्रां ह्रीं ह्रौं सः अदित्याय नमः

॥ चन्द्र ॥

आप्यायस्व समेतु ते विश्वत-स्सोम वृष्णियम् ।
भवा वाजस्य संगथे ॥

दधि-शङ्ख-तुषाराभं क्शीरो-दार्णव-संभवम् ।
नमामि शशिनं सोमं शम्भोर्-मुकुट-भूषणम् ॥

नीशा-कराय विदम्हे काल-नाथाय धीमहि । तन्नस्चन्द्रः प्रचोद्यात् ।

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते
चन्द्राय नमः ।

ॐ श्रीं सोमाय नमः

ॐ श्रां श्रीं श्रौं सः चन्द्राय नमः

॥ अङ्गारक ॥

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाग्ं रेताग्ंसि जिन्वति।

धरणी-गर्भ-संभूतं विद्युत्-कान्ति-सम-प्रभम्।
कुमारं शक्ति-हस्तं च मङ्गलं प्रणमा-म्यहम्॥

अङ्गारकाय विद्महे भूमि-बलाय धीमहि। तन्न-कुजः प्रचोदयात्॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते
अङ्गारकाय नमः।
ॐ क्रीं कुजाय नमः
ॐ क्रां क्रीं क्रौं सः भौमाय नमः

॥ बुध ॥
उद्बुध्य-स्वाग्ने प्रतिजा-गृह्येनमिष्टा-पूर्ते सग्ं-सृजेथा-मयञ्च। पुनः कृण्वग्ग्स्त्वा
पितरं युवानमन्-वाग्ंसीत्वयि तन्तुमेतम्॥

प्रियङ्गु-कलि-काश्यामं रूपेणा-प्रतिमं बुधम्।
सौम्यं सौम्य-गुणोपेतं तं बुधं प्रणमा-म्यहम्॥

बुध-ग्रहाय विद्महे इन्दु-पुत्राय। तन्न-स्सौम्यः प्रचोदयात्॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भवगते

बुधाय नमः।

ॐ ऐं बुधाय नमः

ॐ ब्रां ब्रीं ब्रौं॰ सः बुधाय नमः

॥ बृहस्पति ॥

बृहस्पते अतियदर्यो अर्हा-द्द्युमद्वि-भाति क्रतुम-ज्जनेषु। यद्दिदय-च्चवसर्त-प्रजात

तद्-स्मासु द्रविणन्धेहि चित्रम्॥

देवानां च ऋषीणां च गुरुं काञ्चन-संनिभम्।

भक्ति-भूतं त्रिलोकेशं तं नमामि बृहस्पतिम्॥

सुराचार्याय विद्महे सुरा-श्रेष्ठाय धीमहि। तन्नो गुरुः प्रचोदयात्॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

बृहस्पतये नमः।

ॐ स्त्रीं बृहस् पतये नमः

ॐ ग्रां ग्रीं ग्रौं॰ गुरवे नमः

॥ शुक्र ॥

प्रव-श्शुक्राय भानवे भरध्वग्ं हव्यं मतिं चाग्नये सुपूतम्। यो दैव्यानि मानुषा जनूग्ंषि अन्तर्-विश्वानि विद्म ना जिगाति ॥

हिम-कुन्द-मृणालाभं दैत्यानां परमं गुरुम्।
सर्व-शास्त्र-प्रवक्तारं भार्गवं प्रणमा-म्यहम् ॥

भार्गवाय विद्महे असुरा-चर्याय धीमहि। तन्नो शुक्रः प्रचोदयात् ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते
शुक्राय नमः।
ॐ क्लीं शुक्राय नमः
ॐ द्रां द्रीं द्रौं॰ शुक्राय नमः

॥ शनैश्चर ॥

शन्नो देवी-रभिष्टय आपो भवन्तु पीतये। शंयोर्-अभि-स्रवन्तु नः ॥

नीलांजन-समाभासं रविपुत्रं यमा-ग्रजम् ।

छाया-मार्ताण्ड-संभूतं तं नमामि शनैश्चरम् ॥

शनैश्चराय विद्महे सूर्य-पुत्राय धीमहि । तन्नो मन्दः प्रचोदयात् ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

शनै॑-श्चराय॒ नम॑ः ।

ॐ ह्लीं शनये नमः

ॐ प्रां प्रीं प्रौꣳ शनैश्-चराय नमः

॥ राहु ॥

कया॑ न॒श्चित्र आभु॑-वदू॒ती स॒दावृ॑ध॒-स्सखा᳚ । कया॒ शचि॑ष्ठया वृ॒ता ॥

अर्धकायं महावीर्यं चन्द्रादित्य-विमर्दनम् ।

सिंहिका-गर्भ-संभूतं तं राहुं प्रणमा-म्यहम् ॥

सैम्हिकेयाय विद्महे धुम्र-वर्णाय धीमहि । तन्नो राहुः प्रचोदयात् ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

रहवे नमः।

ॐ धुं राहवे नमः

ॐ भ्रां भ्रीं भ्रौं राहवे नमः

॥ केतु ॥

केतुङ्-कृण्वन्नके-तवे पेशो मर्या अपेशसे। समुषद्-भिरजायथाः - ॥

पलाश-पुष्प-संकाशं तारका-ग्रह-मस्तकम्।

रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमा-म्यहम्॥

चित्र-वर्णाय सर्प-रूपाय धीमहि। तन्नो केतुः प्रचोदयात्॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

केतवे नमः।

ॐ हुं केतवे नमः

ॐ स्रां स्रीं स्रौं केतवे नमः

॥ नवग्रह ॥

आदित्याय च सोमाय मङ्गळाय-बुधाय च।

गुरु-शुक्र-शनिभ्यश्च राहवे केतवे नमः॥

तत करकाय विद्महे नव-ग्रहाय धीमहि ।

तन्नो भवः प्रचोदयात् ॥

॥ दश दिग्पालका ॥

॥ इन्द्र (East) पूर्व ॥

त्रातार-मिन्द्र मवितार-मिन्द्रं हवे हवे सुहवं शूर-मिन्द्रम् ।

हुवे नु शक्रं पुरु-हूतं इन्द्रग्ग् स्वस्ति नो मघवा धात्विन्द्रः ॥

ऐरा-वटक जारूधं स्वर्ण-वर्ण किरीतिनम् ।

सहस्र-नायनं क्षत्रं वज्र पानीं विभावयेत् ॥

सहस्र-नेत्राय विद्महे

वज्र हस्ताय धीमहि ।

तन्नो इन्द्रः प्रचोदयात् ॥

ॐ लं इन्द्राय नमः ।

अग्नि (South east) आग्नेय

त्वंनो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यसि-सीष्ठाः -।
यजिष्ठो वह्नितम श्शोशु-चानो विश्वा द्वेषाग्ग्ंसि प्रमुमुग्-ध्यस्मत्॥

सप्ताधिषं सवी-प्राणं रक्ष-माल कमण्डलुम्।
ज्वाल-माल कुलं देवं शक्ती-हस्तं हजासनम्॥

वैश्वनराय विध्महे
ललेलाय धिमहि।
तन्नो अग्निः प्रचोदयात्॥

ॐ रं अग्नये नमः।

अम (South) दक्षीणा
सुगन्नः पन्था-मभयं कृणोतु। यस्मि-न्नक्शत्रे यम एति राजा। यस्मि-न्नेन मभ्य-
षिञ्चन्त देवाः। तदस्य चित्रग्ं हविषा यजाम॥

कृताङ्तं महिषा-रुधं गन्ध-हस्तं हया-नाकम्।
काल-पाश धारं कृष्णुं ध्यायेत् दक्षिणा दिग्पतिम्॥

महा-कालाय विध्महे

धर्म-राजाय धिमहि ।

तन्नो यमः प्रचोदयात् ॥

ॐ मं यमाय नमः ।

निर्ऋति (South West) नैर्ऋति

असुन्वन्त मयज-मानमिच्च-स्तेन-स्येत्यान्त-स्कर-स्यान्वेषि ।

अन्यमस्म-दिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥

रक्त-नेत्रं शमा-रुधं नीलोद्-पाल-दलाः प्रभुम् ।

कृपा नवाणि मात्सौहं पिबन्तं रक्ष-सेश्वरम् ॥

आधर्म-सुतयै च विद्महे

खड्ग-हस्तयै च धीमहि ।

तन्नो रक्षः प्रचोदयात् ॥

ॐ क्षं निऋतयै नमः रक्षाय

वरुण (West) पश्चिम

तत्वा यामि ब्रह्मणा वन्दमान-स्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुनेह-बोध्युरु सग्ंस मा न आयुः प्रमोषीः - ॥

नाग-पाश धारं देवं रक्तो-रद्युति विग्रहम् ।
शषाङ्क धावलं ध्यायेत् वरुणं मकरासनम् ॥

जाल-बिम्बाय विद्महे
नील पुरुषाय धीमहि ।
तन्नो वरुणः प्रचोदयात् ॥

ॐ वं वरुणाय नमः ।

वायु (North West) वायव्य

आ नो नियुद्भि श्शतिनि-भिरध्वरम् । सह-स्त्रिणीभि रुपयाहि यज्ञम् ।
वायो अस्मिन् हविषि मादयस्व । यूयं पात स्वस्तिभि स्सदा नः ॥

आवीरं अमितश्-छायं वीलोल ध्वज-धारिनम् ।
प्राण-भूतं च भूताणां घृणि-हस्तं समी-रिनम् ॥

तत् पवनाय विद्महे

प्राणा-ग्रजाय धीमहि ।

तन्नो वयुः प्रचोदयात् ॥

ॐ यं वायवे नमः ।

सोम (North) उत्तर

वयग्ं सोम व्रते तव । मनस्त-नूषु बिभ्रतः । प्रजावन्तो अशीमहि ॥

कुबेरं मानु-जासीनं सगर्वं गर्व-विग्रहम् ।

स्वर्णश्-छायं गद-हस्तं उत्तरा-दिग्पतिं स्मरेत् ॥

वैश्व-रनाय विद्महे

धन-धान्याय धीमहि ।

तन्नो सोमः प्रचोदयात् ॥

ॐ शम् कुबेराय नमः सोमाय

ईशान (North East) ईशान्य

तमीशानं जगत स्तस्थु-षस्पतिम्। धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा
वेद्-सामस-द्वृधे। रक्शिता पायु रदब्ध स्स्वस्तये॥

ईशानं वृषभ-रुधं त्रिशूलं व्याल-धारिणम्।
शरश्-चन्द्र समाकारं त्रिनेत्रं नील-कण्ठकम्॥

तत् ईशानाय विद्महे
सदा-शिवाय धीमहि।
तन्नो ईशः प्रचोदयात्॥

ॐ हं ईशानाय नमः।

ब्रह्म (Above) उर्ध्व

अस्मे रुद्रा मेहना पर्वतासो वृत्र-हत्ये भर हूतौ सजोषाः।
यश्शंसते स्तुवते धायि पज्र इन्द्र-ज्येष्ठा अस्मागं अवन्तु देवाः -॥

चतुर्-मुखय विद्महे

हम्स-रुधाय धिमहि ।

तन्नो ब्रह्म प्रचोदयात् ॥

ॐ ह्रीं ब्रह्मणे नमः ।

अनन्त (Below) अथ

स्योना पृथिवी भवा-नृक्शरा निवेशनी ।

यच्छा-नश्शर्म सप्रथाः ॥

आदि-शेषाय विद्महे

अननत-रूपाय धीमहि ।

तन्नः शेषः प्रचोदयात् ॥

ॐ अं अनन्ताय नमः ।

॥ दश दिग्पालका ॥

इन्द्राग्नि-यम-निर्ऋतिं वरुणं वयु-कुबेरं ।

ईशानं ब्रह्मा-नन्तश्च दिग्देवता नमोऽस्तु ते ॥

॥ वास्तु पुरुष ॥

वास्तोष्पते प्रति जानी-ह्यस्मान्त्-स्वावेषो अनमीवो भवा नः ।
यत्वेमहे प्रति तन्नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे ॥

प्रसीद पहि विश्वेश देहि मे गृहायं सुखम् ।
नमस्ते वास्तु-पुरुष पुरुषे याधि तत प्रभो ॥

वास्तु-पुरुषाय विद्महे भूमि-पुत्राय धीमहि ।
तन्नो वास्तुः प्रचोदयात् ॥

ॐ वास्तु-पुरुषाय नमः ।

॥ पितृ ॥

उशन्तस्त्वा हवामह उशन्तः समिधीमहि ।
उशन्नुशत आ वह पितृन् हविषे अत्तवे ॥

अशिषो मे प्रदीयन्तां पितरः करुणा-मयाः ।
वदाः सन्ततयो नित्यं वर्द्धन्तां बान्धवा मम ॥
अनादि-निधनो देवः शङ्ख-चक्र-गदा-धरः ।

अक्षयः पुण्डरी-काक्षः प्रेत-मोक्ष-प्रदो भव ॥
तिल-पात्राणि देयानि शिवभक्त-द्विजेषु च ।
उमा-महेश्वरं चैकं परिधाप्य प्रिदापयेत् ॥

ॐ नमो वः पित्रः सौम्यः स्वधा नमस्तर्पयामि ।
ॐ मातृपितृभ्यं नमः ॥

देव-पितृ-कार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्य-देवो भव । अतिथि-देवो भव । यान्यन-वद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्-माकꣳ सुचरिताणि । तानि त्वयोपास्याणि । नो इतरा ॥

॥ मन्त्र पुष्पम् ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ १ ॥ अग्निर्वा अपामायतनम् । आयतनवान् भवति । योऽग्नेरायतनं वेद । आयतनवान् भवति । आपो वा अग्नेरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ २ ॥ वायुर्वा अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति । आपो वै वायोरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ।

आयतनवान् भवति ॥ ३ ॥ असौ वै तपन्नपामायतनम् । आयतनवान् भवति । योऽमुष्य तपत आयतनं वेद । आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ४ ॥ चन्द्रमा वा अपामायतनम् । आयतनवान् भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ५ ॥ नक्शत्राणि वा अपामायतनम् । आयतनवान् भवति । यो नक्शत्राणा-मायतनं वेद । आयतनवान् भवति । आपो वै नक्शत्राणा-मायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ६ ॥ पर्जन्यो वा अपामायतनम् । आयतनवान् भवति । यः पर्जन्यस्यायतनं वेद । आयतनवान् भवति । आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ७ ॥ संवत्सरो वा अपामायतनम् । आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद । आयतनवान् भवति । आपो वै संवत्सरस्यायतनम् । आयतनवान् भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ ८ ॥

राजाधिराजाय प्रसह्य साहिने ।
नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् काम कामाय मह्यं ।
कामेश्वरो वै श्रवणो ददतु ।

कुबेराय वै श्रवणाय ।

महाराजाय नमः ॥

आं तद्ब्रह्म । आं तद्वायुः । आं तदात्मा । आं तत्सत्यम् । आं तत्सर्वम् । आं तत्पुरोर्-नमः ॥ अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्-कारस्त्वम्-इन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ॥

॥ सन्न्यासि सूक्तम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानसुः ।

परेण नाकं निहितं गुहायां विभ्राजदे-तद्-यतयो विशन्ति ॥

वेदान्त-विज्ञान सुनिश्चितार्थाः संन्यास योगाद्-यतय-शुद्ध-सत्त्वाः ।

ते ब्रह्म-लोके तु परान्त-काले परामृतात्-परिमुच्यन्ति सर्वे ॥

दह्रं विपापं परमेऽश्म भूतं यत्-पुण्डरीकं पुर-मध्य-सग्गस्थम् ।

तत्रापि दह्रं गगनं विशोकस्-तस्मिन् यद्-अन्तस्-तद्-उपासितव्यम् ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृति-लीनस्य यः पर-स महेश्वरः

॥ क्षमर्पनम् ॥ Appologies (namaskaara mudra)

आवाहनं न जानामि न जानामि विसर्जनं ।

पूजाञ्-चैव न जानामि क्षम्यतां गज-कर्णक ॥
मन्त्र-हीनं क्रिया-हीनं भक्ति-हीनं गणेश्वर ।
यत् पूजितं मया देव परि-पूर्णं तदस्तु ते ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्य-भावेन रक्ष रक्ष गणेश्वर ॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्य द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥
कायेन वाचा मनसेन्-द्रियैर्वा
बुध्याऽऽ ।त्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि ॥

॥ पञ्च शान्तिः ॥

ॐ शं नो॑ मि॒त्रः शं वरु॑णः । शं नो॑ भवत्-वर्य॒मा । शं न॒ इन्द्रो॒ बृह॒स्पति॑ः । शं नो॒ विष्णु॑-रुरुक्र॒मः । नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्रत्य॒क्षं॒ ब्रह्मा॑सि । त्वामे॒व

प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मा-मवतु ।
तद्वक्तार-मवतु - अवतु माम् । अवतु वक्तारम् ।
ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्-वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो
विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव
प्रत्यक्षं ब्रह्मा-वादिषम् । ऋत-मवादिषम् । सत्य-मवादिषम् । तन्मा-मावीत् ।
तद्वक्तार-मावीत् । आवीन्माम् । आवीद्-वक्तारम् ।
ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु ।
मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो
वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्र-पतिभ्यो मामा-मृषयो मन्त्र-कृतो
मन्त्र-पतयः परादुर्मा ऽहमृषीन्-मन्त्र-कृतोमन्त्र-पतीन्-परादां वैश्वदेवीं वाच-
मुद्यासगं शिवा-मदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म-पृथिवी शर्म विश्वमिदं
जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म-प्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो
वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिद-मुप-

स्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुप-स्तरण-महं प्रजायै पशूनां

भूयासं प्राणापानौ मृत्योर्-मापातं प्राणापानौ मा मा हासिष्टं मधु मैनिष्ये मधु

जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधु-मतीं देवेभ्यो वाच-मुद्यासग्ं शुश्रू-षेण्यां

मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ तच्छं योरा-वृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीस्स्वस्तिरस्तु नः ।

स्वस्तिर्-मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।

ॐ शान्ति श्शान्ति श्शान्तिः ॥

काले वर्षन्तु पर्जन्यः - पृथिवी सस्य-शालिनीः ।

देशोऽयं क्षोभर-हितः - ब्राह्मणाः सन्तु निर्भयाः ॥

अपुत्राः पुत्रिणः सन्तु - पुत्रिणः सन्तु पौत्रिणः ।

अधनाः सधनाः सन्तु - जीवन्तु शरदां शतं ॥

स्वस्ति प्रजाभ्य परिपा-लयन्तां

ॐ न्याय्येन मर्गेन महीं महीशाः ।

गोब्रह्म-नेभ्यः शुभं अस्तु नित्यं

लोकाः समस्थाः सुखिणो भवन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

सर्व जनाः सुखिनो भवन्तु । तथाऽस्तु ॥

समस्त सन्मङ्गळानि सन्तु । तथाऽस्तु ॥

उत्तरो-त्तरा-भिवृद्धिरस्तु । तथाऽस्तु ॥

उत्तरे कर्मणि निर्विघ्नमस्तु । तथाऽस्तु ॥

राज धर्मिकी विजयी भवन्तु । तथाऽस्तु ॥

देशोऽयं निरुप-द्रवोऽस्तु । तथाऽस्तु ॥

सत्या एषा आशिषः सन्तु । तथाऽस्तु ॥

ॐ तत् सत् ॐ । दक्षिणा-मुत्यार्पनमस्तु ॥